International Journal of Sanskrit Research 2019; 5(2): 38-44

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(2): 38-44
© 2019 IJSR
www.anantaajournal.com
Received: 14-01-2019
Accepted: 18-02-2019

**Jhantu Das**
Research Scholar, Dept. of Sanskrit, Raiganj University, West Bengal, India

**Correspondence**
**Jhantu Das**
Research Scholar, Dept. of Sanskrit, Raiganj University, West Bengal, India

# किं नाम संस्कृतकथाकाव्यम्

**Jhantu Das**

**प्रबन्धसारः**
रसभाण्डमिव सुविस्तृतं संस्कृतसाहित्यम्। तदास्वादे ब्रह्मस्वादसहोदरानन्दप्राप्तिर्भवति। भूभागे आनन्दप्राप्तिः एव जीवनस्य मूलम्। साहित्येऽस्मिन् नानाविधा विभागा उपविभागाः सन्ति। तेषु संस्कृतकथासाहित्यमेकम्। विभागोऽयं न केवलं संस्कृते, साहित्येतरे अप्युपलभ्यते। साहित्येनानेन आ वाल्यात् सर्वान् मानवान् प्रति नीतिशाक्षाप्रदानं यथार्थतया घटते। संस्कृते सर्वैरालंकारिकैः स्वग्रन्थे कथायाः चर्चा कृता। तत्र मतवैचित्र्यमपि दृश्यते। यद्वा भवतु प्रबन्धेऽस्मिन् संस्कृतसाहित्यस्यास्य यत्स्वरूपं वैशिष्ट्यं तस्य च भेदाः सन्ति तदेव प्रदर्श्यते मया।

**कुञ्चिकाशब्दः** संस्कृतवाङ्मयम्, साहित्यम्, गद्यम्, कथा, छोटोगल्पः, सहृदयः, वृत्तम्, कल्पना, सरसं वस्तु, आख्यायिका।

## प्रस्तावना
अस्यां पृथिव्यां मानवसभ्यतायाः आरम्भकालादेव लब्धप्रसवं कविप्रतिभाया अमृतमयं फलं भवति साहित्यम्। कारणं हि साहित्यं मानवस्य प्रतिफलनं दर्पणं वा। कविवाङ्मयसृष्ट्यात्मकस्य तस्य साहित्यस्य रूपद्वयं वर्तते। यत्तस्य सार्वजनीनम् अतीवान्तरं रूपं तत्तु प्रायेणापरिवर्तितमेवास्ति। यत् पुनः सामयिकं किञ्चिदिव बहिरङ्गतम्, रूपं तदेव समये समये प्रदेशे प्रदेशे विवर्तते। सामाजिकी स्थितिः शिक्षाभ्याससंस्कारादिजन्या कवेर्मानसिकी प्रवृत्तिः साहित्यिकानन्दं सृजायतुमलम्। एतेन सहृदयानां मानसिकरुचिरपि अभिव्यक्ता भवति। तामेव स्थितिमनुरुन्धाना संस्कृतवाङ्मये प्रवहन्ती साहित्यधारापि कदाचिन्नैकरूपः परिप्राप्यते। तथाहि कथ्यते वैदिकसाहित्यमेकविधमेव। वैदिकाः ऋषयो न केवलं यज्ञीयमन्त्राणां द्रष्टारोऽपि च वैदिकमन्त्रेषु ऋषिहृदयानां काव्यिकी अभिव्यक्तिः सुतरामेव लक्षणीया। रामायणमहाभारतादिगतं साहित्यमपरविधमासीत्। लौकिकसंस्कृतसाहित्ये आदिकाव्यं तावद्रामायणम्। कालिदासपूर्ववर्तिनी कविप्रतिभा कालिदाससमये कालिदासपरवर्तिनी काले च नितरां परिवर्तते। साम्प्रतिककाले समयसीमनि प्रवहन्ती अर्वाचीनकाव्यधारा पुनः भिन्नरूपा प्रचलति। अतः साहित्यसन्तानो नियतं स्पन्दनशीलो नैकरूपात्मकश्चेति।
संस्कृतवाङ्मयं अपौरुषेयं पौरुषेयञ्च द्विधा विभज्यते। पुरुषकृतेषु संस्कृतवाङ्मेषु एकं भवति काव्यम्। कव्यस्य विविधाः भेदाः सन्ति गद्यपद्यमिश्रश्चेति।

सर्वेषु काव्यभेदेषु गद्यकाव्यनिर्माणम् आयाससाध्यम्। तथाहि उच्यते 'गद्यं कवीनां निकषं वदन्ति।' [1] इति। पुनरपि गद्यकाव्येषु उपभेदाः, तेषु एकं कथाकाव्यम्। निम्ने कथायाः स्वरूपं वैशिष्ट्यञ्च प्रस्तौमि -

**कथाकाव्यम्**

'जो देश लोककथाओँ से जितनी ही समृद्ध है, उतना ही वह सभ्य और सुसंस्कृत माना जाता है।' इति जगदीशचन्द्रजैनमहाभागस्य वाक्यमिदं प्रमाणयति कथा हि सभ्यतायाः संस्कृतिः, तदभावे च सभ्यताया विनाशो भवेत्। किन्तु तन्न भवेत् भारतवर्षेऽस्मिन्। भारते कथाया भाण्डारोऽसीमः। कथाप्रिया हि मानवाः। कथाः साधारणतया केवलं बालकानां कृते इति तु न ध्रुवम्, परं समेषां साधारणमनुजनानां कृतेऽपि आदरणीयाः कथाः। बाल्यावस्थायां माता सस्नेहं क्रोडे नीत्वा निद्रायै कथाः श्रावयति। तस्मादेवास्माकं मनसोऽवचेतने स्तरे स्वभावत्वेन कथा श्रवणस्यैकान्तिकी वासना सुप्तरूपेण च जागरिता भवति। तदा मातारोचिष्णुतया राजकाहिनीयुता उत पशुपक्षिराज्यस्य काल्पनिकीवृत्तोपेताः कथाः स्वमनसोमाधुरीं संमिश्र्य परिवेशयति पाठकसमीपे। मातुस्तु लक्ष्यं केवलं बालस्य निद्रोत्पादनम्। किन्तु प्रभावोऽस्य दीर्घस्थायी भवति शिशुमनसि। वयसोबर्धमानेन समं सा प्रवृत्तिर्नितरां विबर्धिता क्रमेणैव। स्वाभाविकगत्या कथाया अपि प्रकृतिः परिवर्तिता सञ्जायते। बालकानां कथाभिः रुचिः तद्वयोऽनुसारिणी भवेत्। न केवलमेतत्प्रवृत्तिः शिशूनामपि च वयस्कानाम्। गम्भीरविषयान्विबोधयितुं सारल्येनोपस्थापयितुं चास्माभिरुपाख्यानान्याश्रियन्ते। वेदात्परवर्तिनिकाले रामायण-महाभारतपुराणादिसाहित्येऽपि बाहुल्येनोपाख्यानानि परिप्राप्यन्ते। ततः परं संस्कृतवाङ्मये कथासाहित्यस्य प्रकाशः। पञ्चतन्त्रहितोपदेशादिग्रन्थानां विरचनोद्देश्यं तावद्बालमतीनां नीतिशिक्षाप्रदानेन बुद्धेर्विकाशसाधनम्। अवान्तरप्रयोजनान्यन्यानिसन्त्यपि मनोविनोदनमेव कथायाः मूलमुद्देश्यम्। संस्कृतेतरसाहित्ये प्राचुर्येण कथाप्रपञ्चमस्ति।

**कथाशब्दस्यार्थः**

'वृत्तबन्धोज्झितं गद्यम्' [2] इति साहित्यदर्पणवचनानुसारं वृत्तरहितं रसभावान्वितं वाक्यं भवति गद्यम्। गद्यकाव्यमिदं पञ्चधा विभज्यते इत्यस्ति अग्निपुराणे –

'आख्यायिका कथा खण्डकथा परिकथा तथा।
कथानिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा।।' [3] इति

कथ्यते इति कथा इति वुत्पत्या 'वाक्यप्रबन्धे कथ्' [4] इति धातुपाठानुसारं कथ् इति धातुना सह 'चितिपूजिकथिकुम्बिचर्चश्च' [5] इति सूत्रेण अङि प्रत्यये सति स्त्रित्वविवक्षायाम् 'अजाद्यतष्टाप्' [6] इत्यनेन टापि कथेति शब्दो निष्पद्यते। संस्कृतसाहित्ये कथाशब्दस्य निश्चितरूपेण लघुकल्पनार्थे प्रयोगो दृश्यते। अत्र वक्ता श्रोता चोभयोरेव उपस्थितिः अपरिहार्य्या एव। आङ्गलसाहित्ये गल्पकथा तथा काल्पनिककथासाहित्यं फिकशन् (Fiction) नाम्नाभिहितम्। उर्दू-आरवि-फारसि-हिन्तीसाहित्येऽपि कथेयं रचिता कविभिः। तस्याः नामान्तरं भवति खाल खालि वेति। आधुनिकसंस्कृतकथासाहित्ये लघु-टुप्-पुट्-पत्र-त्रासद-ललित-स्पश-व्यङ्ग-विनोदकथानां व्यवहारो दृश्यते। समस्ते वैदिकेसाहित्ये कथाशब्दः परिप्राप्तोऽपि ऐतरेयब्राह्मणे। सर्वप्रथममेव कथाशब्दः 'आख्यानार्थे' प्रयुक्तः आसीत्। सायणेन तत्रोक्तम् 'कथा न वदेल्लौकिकी वार्ता न कुर्यात्' इति। मनुना रचनार्थे कथाशब्दस्य प्रयोगः कृतः – 'यद्यद्रोचेत विप्रेभ्यस्तत्तद्द्यामत्सरः। ब्रह्मोद्याश्च कथाः कुर्यात् पितृणामेतदीप्सितम्' [7] इति। विवरणार्थे प्रयोगः प्राप्यते रामाणये – 'सनत्कुमारो भगवान् पुरा कथितवान् कथाम्। भविष्यं विदुषां मध्ये तव पुत्रसमुद्भवम्।।' [8] इति। वाक्यमित्यर्थे व्यवहारोऽस्ति रघुवंशे - 'अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु।' [9] इति। अपि चास्ति शाकुन्तले – 'का कथा वाणसन्धाने ज्याशब्देनैव दूरतः।' [10] इति, 'कथां प्रमत्तः प्रथमं कृतामिव।' [11] इति। अमरकोषे अस्ति 'आख्यायिकोपलब्धार्था प्रबन्ध कल्पना कथा' इति। शब्दकल्पद्रुमे उद्धृतस्य कोहलाचार्यस्य मतमपि एकमेव – 'प्रबन्धकल्पनां स्तोकसत्या प्राज्ञाः कथां विदुः। परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित्।' [12] इति। हलायुधेन

कथाशब्दस्यार्थचतुष्टयमवादि – क) प्रबन्धकल्पना ख) स्वयंरचना ग) वार्ता घ) विवरणमिति च। विश्वनाथेन साहित्यदर्पणे कथा तावदेवं संज्ञिता - 'कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्' [13] इति। अग्निपुराणे कथासंज्ञाविषये दृश्यते –

'श्लोकैः स्ववंशं संक्षेपात् कविर्यत्र प्रशंसति।
मुख्यस्यार्थावताराय भवेद् यत्र कथान्तरम्।।
परिच्छेदो न यत्र स्याद् भवेद् वालम्भकैः क्वचित्।
सा कथा
नाम..........................................।।' [14] इति

अर्थाद् यत्र कविः कियद्भिः श्लोकैः संक्षेपेण स्ववंशवृत्तान्तं प्रकाशयति, यत्र विषयोपस्थापने कथान्तरं वर्णितम्, आख्यानस्य परिच्छेदविभागो न प्राप्यते, परन्तु कुत्रचित् आलम्भकशब्देन ग्रन्थविभाजनपद्धतिः दृश्यते सा एव कथा। रुद्राटाचार्यकृते काव्यालंकारे अपि कथायाः संज्ञा प्राप्ता। तत्रास्ति –

'श्लोकैर्महाकथायामिष्टान् देवान् गुरुन् नमस्कृत्य।
संक्षेपेण निजं कुलमभिदध्यात् स्वं च कर्तृतया।।
सानुप्रासेन ततो भूयो लघ्वक्षरेण गद्येन।
रचेयेत् कथाशरीरं पूरेव पूरवर्णकप्रभृतीन्।।
आदौ कथान्तरं वा तस्यां न्यस्येत् प्रपञ्चितं सम्यक्।
लघुतावत्सन्धानं प्रक्रान्तकथावताराय।।
कन्यालाभफलां वा सम्यग् विन्यस्तसकलसृङ्गाराम।
इति संस्कृतेन कुर्य्यात् कथामगद्येन चान्येन।।' [15] इति

अत्राशयस्तावत् कथायाः आदौ देवगुरुवन्दना, कविपरिचितिः, तदन्तरं अनुप्रासयुक्तेन गद्येन वृत्तोपस्थापनम्, आख्याने कन्यालाभादिविषयस्य वर्णना स्यात्। यदि संस्कृतकथा भवति तर्हि गद्येन स्यात् किन्तु प्राकृते भवति पद्येन।
भामहकृते भामहालंकारे/काव्यलंकारे अस्ति –

'...न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छवासवत्यपि।
संस्कृतं संस्कृताचेष्टा कथापभ्रंशभाक् तथा।।
अन्यैः स्वरचितं तस्यां नायकेन तु नोच्यते।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः।।
अनिबद्धं पुनर्गाथाश्लोकमात्रादि तत् पुनः।
युक्तवक्त्रस्वभावोक्त्या सर्वमेवैतादिष्यते।।' [16] इति

कथाकाव्ये पद्येन देवतायाः गुरोः च प्रशंसा, नमस्कारः स्थापनीयः अपि कविवंशवर्णना करणीया। वक्त्रापरवक्त्रछन्दसा ग्रथिकश्लोको न स्यात्, आख्यानस्य उच्छवासविभागो न करणीयः, संस्कृतं संस्कृतेतरं भाषया भवितुमर्हति कथाकाव्यम्। अत्र नायकेतरं जनः वक्ता भवेतदित्यादिनि वैशिष्टानि प्राप्यन्ते कथाकाव्ये।
साहित्यदर्पणे विश्वनाथेनापि रुद्रटकृतकथालक्षणम् अनुभूय कथा चिह्निता एवं प्रकारेण–

'कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।
क्वचिदत्र भवेदार्य्या क्वचिद्वक्त्रापरवक्त्रके।।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम्।' [17] इति

आशयो भवति रसस्पर्शसमन्वितवृत्तोपेता कथा गद्येन निर्मिता स्यात्। तत्र कुत्रचित् आर्या, कुत्रचित् वा वक्त्रापरवक्त्रछन्दसा विरचितः श्लोकः स्थापनीयः। कथादौ पद्येन देवादेर्नमस्कारो वन्दना वा भवति। अपि च सज्जनदुर्जनयोः स्वभावरुल्लेखनीयः कविभिः।
विषयेऽस्मिन् आचार्यः दण्डी भिन्नमार्गानुसारी। तेन काव्यादर्शे आदौ गद्यस्य कथाख्यायिका भेदेन भेदद्वयं स्वीकृत्य पुनः तयोः पार्थक्यं न लब्धम्। दण्डीकृता तयोरालोचना निम्ने प्रदीयते –

'अपादः पदसन्तानो गद्यमाख्यायिका कथा।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल।
नायकेनैव वाच्यान्या नायकेनेतरेण वा।
स्वगुणाविष्क्रिया दोषो नात्र भूत्यर्थशंसिनः।
अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्।
अन्ये वक्ता स्वयं वेति कीदृग् वा भेदलक्षणम्।।

वक्त्रञ्चापरवक्त्रञ्च सोच्छवासत्वञ्च भेदकम्।
चिह्नमाख्यायिकायाश्चेत् प्रसङ्गेन कथास्वपि।।
आर्यादिवत् प्रवेशः किं नावक्त्रपरवक्त्रयोः।
भेदश्च दृष्टो लम्भादिरुच्छवासो वास्तु किं ततः।।
तत् कथाख्यायिकेत्येका जातिः संज्ञा द्वयाङ्किता।
अत्रैवान्त भविष्यन्ति शेषाश्चाख्यानजातयः।।' [18] इति

अत्रेदमवधेयं यत् कथाख्यायिकयोः विशेषनियमे अपि अनियमः दर्शनीयः। अतएव सर्वत्र कवेः भावगता कथा इति तु समीचिनमतम्। तयोः कोऽपि भेदो नास्ति, एका एव जातिः तद्भवति गद्यकाव्यम्। तथाहि अन्तिमे दण्डिनावाचि –

'कन्याहरणसंग्राह विप्रलम्भोदयादयः।
सर्गबन्धोसमा एव नैते वैशेषिका गुणाः।।
कविभावकृतं चिह्नमन्यत्रापि न दुष्यति।
मुखमिष्टार्थसंसिद्धौ किं हि न स्यात् कृतात्मनाम्।।' [19] इति

कन्याहरणम्, संघर्षम्, नायकस्याभ्युदयः चेत्येता विषयाः महाकाव्ये अपि वर्तते। अतः तन्न कथाकाव्यस्य विशेषत्वम्। कथायां कवेरिच्छानुसारं विशेषो भवितुमर्हति किन्तु आख्यायिकायां यदि न स्यात् विशेषस्तत्रापि न दोषो भवेत्। विद्वांस इष्टसाधनाय कार्यस्यादौ माङ्गलिकशब्दस्य प्रयोगकर्तुं शक्नुवन्ति।
कथाकारेण वाणभट्टेनापि कथा स्वीकृता। तेन कादम्बरीकाव्यं कथाकाक्यरूपेण स्थिरीष्टीकृतम्। तदस्ति कादम्वरीकाव्ये कविवंशवर्णनांशे

'द्विजेन तेनाक्षतकण्ठकौण्ठ्यया
महामनोमोहलीमसान्धया।
अलब्धवैदग्ध्यविलासमुग्धया धिया
निबद्धेयमतिद्वयीयकथा।।' [20] इति

कथाकाव्येन सह आख्यायिका अपि स्वीकृता वाणभट्टेन। स्वरचितहर्षचरितम् आख्यायिकारूपेणोल्लिखितं तेन –

'तथापि नृपतेर्भक्त्या भीतो निर्वहणाकुलः।
करोम्याख्यायिकाम्भोधौ जिह्वाप्लावनचापलम्।।' [21] इति

द्वादशशतकेन आलंकारिकेन हेमचन्द्रेनापि कादम्बरी कथा, हर्षचरितम् आख्यायिकाकाव्यरूपेण निर्देश्यते।
'वाचस्पत्यकाषे', हेमचन्द्रकृत' काव्यानुशासने' बहुत्रैव च कथाशब्दस्योल्लेखः प्राप्यते। किन्तु लघुकथा कथासाहित्यस्य काहिनीमूलकं विशेषरूपमात्रम्, यच्चाकारेण संक्षिप्तं भवति। रवीन्द्रनाथेन 'सोनारतरि' इतिकाव्यस्य 'वर्षायापन' कवितायां लघुकथाविषये स्वमतं समुल्लिखितम् –

'छोट प्राण छोट व्यथा छोट छोट दुःख कथा
नितान्त सहज सरल,
सहस्र विस्मृति राशि प्रत्यग येतेछे भासि
तारि दु-चारटि अश्रुजल।
नाहि वर्णनार छटा घटनार घनघटा,
नाहि तत्त्व नाहि उपदेश
अन्तरे अतृप्ति रवे साङ्ग करि मने हवे
शेष हये हइल ना शेष।।' [22] इति।

बङ्गभाषायां यत् 'छोटगल्प' इति तच्च संस्कृतभाषायां लघुकथानाम्ना व्यपदिश्यते। आमेरिकावास्तव्येन एडगार-एलान-पोमहाभागेन 'The Philosophy of composition' इति प्रबन्धे भणितम् -
'A short story should be read in one sitting, anywhere from a half hour to two hours. In contemporary fiction, a short story can range from 1,000 to 20,000 words. Because of the shorter length, a short story usually focuses on one plot, one main character (with a few additional minor characters), and one central theme, whereas a novel can tackle multiple plots and themes, with a variety of prominent characters. Short stories also lend themselves more to experimentation – that is, using uncommon prose styles or literary devices to tell the story. Such uncommon styles or devices might get tedious and downright annoying, in a novel, but they may work well in a short story.' [23]

उइलियम-हेनरि-हटसन-महोदयानां मतानुसारम् - 'कहानी को हमे इस रूप मे प्रभावित करना चाहिये कि वह रूपरेखा मे पूर्णतः स्पष्ट, सन्तुलित उद्देश्य के लिये पर्याप्त विस्तृत किन्तु भीड–भाड के तनिक भी संकेत से रहित और अपने ताने-वाने मे पूर्ण हो।' [24] इति।

कथायाः भिन्नता तस्याः संज्ञानिर्माणे बाधा। छोटोगल्पस्य संज्ञाविषये एइच.जि.ओयेलस् महोदयस्याभिमतम् – 'A short story is, or should be, a simple things; it aims at proudicing one single vivid effort: it has to seize the attention at the outset, and never relaxing, gather it together more and more until the climax is reached. The limits of human capcity to attend closely therefore set a limit to it; it must expode and finished before interrution occurs or fatigue sets in.' [25] इति।

पुनरपि 'Problem of definition' आलोचनावसारे कथासंज्ञा एवं लक्षिता आयान रीड महोदयैः – 'In current usage short story is generally applied to almost any kind of fictitious prose narrative briefer than a nove.' [26] इति।

बङ्गसाहित्ये साहित्यसमालोचकेन शितलचौधुरीमहोदयेन सुष्ठुतया छोटोगल्पस्य शैली निरूपिता आसीत् – 'छोटगल्पेर आकृति येमन छोट हवे, तार सङ्गे गल्प व्यापारटिकेओ अङ्गाङ्गि भावे युक्त हते हवे। स्वल्पपरिसरे यथेष्ट नाटकीय मुहूर्त सृष्टिर माध्यमे जीवनेर कोनो एकटि घटना वा वाँकके यथायथभावे तुले धरते हवे। छोटगल्पेर गतिओ हवे द्रूतगामी। मने राखते हवे, नाटकीय मुहूर्त सृष्टि ना हले छोटगल्पेर गति कखनोइ द्रूतगामी हओया सम्भव नय, एर अभावे गति धीर हये यावे।' [27] इति।

अपि हिन्दीसाहित्ये प्रेमचन्द्रकविना कथायाः नामान्तरं काहिनी इत्युच्यते, तल्लक्षणम् यथा – 'कहानी वह ध्रुपद की तान् है, जिसमे गायक महफिल शुरु होते कि अपनी संपूर्ण प्रतिभा दिखा दिता है, एक क्षण मे चित्त को इतने माधुर्य से परिपूर्ण कर देता है, जितना रात भर गाना सुनने से भी नहीं हो साकता।' [28] इति।

**पूर्वोक्तकथानुसारं कानिचिद्वैशिष्ट्यानि प्राप्यन्ते कथायाः –**

- कथायां केवलमेकं रसमुहूर्तं स्यात्।
- कथा सहजा सरला सुखबोद्धा च स्यात्।
- कथाविषयः कथमपि पाठकानां मानसिकतां नातिक्रमति।
- कथान्तिमे मनसि अतृप्तिः स्यात्।

## (ग) कथाया विवर्तनम्

संस्कृतसाहित्यम् सुप्रचीनं प्रथागतसाहित्यम्। अत्र नास्ति नूतनत्वम्, सृजनशीलता अत्र अकल्पनीया एव इति धारणास्ति जनमनसि। अस्य कारणं भवति विविधाः संस्कृतकृतयः। ऋग्वेदाद् ध्रूपदिसाहित्यमतिक्रम्य वर्तमाने ऊनविंशशतके अपि अधिका रचना प्रथागतसीमा न लङ्घिता। अत्र स्मरणीयं विविधानां कथाकाव्यानां बीजं निहितमस्ति वेदे। वैदिकयज्ञसम्बन्धिनां वीरत्वव्यञ्जक-माहात्म्यकीर्तनात्मानाम् आख्यानोपाख्यानामाधारो भवति वैदिकधर्मः। सुप्राचीनकालादारभ्य वेदोपनिषत्सु रामायण-महाभारत-पुराणादि ग्रन्थेषु विविधा कथाः परिप्राप्यन्ते अस्माभिः। यथा वेदे याज्ञवल्क्यमैत्रेयीकथा, यमनचिकेताकथेत्यादि।

रामायणमहाभारतपुराणदिध्रुपदिसाहित्यं तस्यानुसारि। यथा अम्बा-शिखण्डिनी-शिखण्डीकथा, नल-दमयन्तीकथा, रुरु-प्रमद्वाराकथा अपि च विश्वविश्रुता शकुन्तलाकथा।

परवर्तिनि काले लोककथामवलम्ब्य मार्गान्तरानुसारिरचनाया प्रारम्भो गुणाढ्यरचितो बृहत्कथातः सोमदेवस्य कथासरित्सागरः, बुद्धस्वामिनः वृहत्कथाश्लोकसंग्रहः, क्षेमेन्द्रस्य वृहत्कथामञ्जरी। अपि च वर्तते विष्णुशर्माकृतः पञ्चतन्त्रः, नारायणशर्माकृतः हितोपदेशः, वेतालपञ्चविंशतिकथा, शुकसप्ततीकथेद्यादि कथाः अन्यतमाः। ततः शनैः शनैः एका धारा निर्दिष्टा अभवत् कथासाहित्ये।

ध्रुपदिसंस्कृतकथासाहित्यम्

उपदेशमूलकपशुपक्षिकथामाधारीकृत्य रचिते अपि तस्याः सीमा निर्दिष्टासीद् वैचित्रताया न्यूनता दरीदृश्यते।

परन्तु उनविंशतिशतकात् आरभ्य आधुनिकसंस्कृतसाहित्यं विशेषतः आधुनिकसंस्कृतकथासाहित्यं न

निर्दिष्टनियमरीतिनियन्त्रणाधीनम्। तस्याः रीतिः सर्वदा परिवर्तनशीला। लोकानामानन्दोत्पादनाय समकालिकविषयमवलम्ब्य कवयः कृतिं प्रदर्शयन्ति। अतीतकालवत् आधुनिके काले अपि समसामयिकावस्थामवलम्ब्य कवयः कथां रचयन्ति। कथारचनाया प्रवाहो न केवलं बङ्गे, भारते बहिर्विश्वे सर्वत्रैवापि अविच्छिन्ना धारा प्रवहति।

**उपसंहृतिः**

कथाया भेदकरणमसम्भवमेव। तथापि विविधग्रन्थे कथाया विभागः दृश्यते अस्माभिः, विशेषतः कथा आख्यायिका प्रधाना। परन्तु तस्या ये भेदाः उपभेदाः सन्ति ते न च सर्वजनग्राह्याः। कथाया भेदविषये आचार्यदण्डिमतं स्मरणीयम् –

> ‘तत् कथाख्यायिकेत्येको जातिः संज्ञाद्वयाङ्किता।
> अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः॥’ [29]
> इति

यद्वा भवतु, कथा लघुकथा वा कविरभिरुचिना प्रकाश्यते। सर्वेषां मानवानां रसबोधाय नैतिकोपदेशाय च कथा तुलनाहीना। तस्याः अनवद्यता न केवलं शास्त्रे व्यवहारिकजीवने स्वल्पबुद्धीनां पण्डितानाञ्च मनसि जाज्वल्यते दीप्यते चेति दिक्।

**ग्रन्थसन्दर्भसूची**


1. काव्यालंकारसूत्रवृत्तिः, १/३/२१, वृत्तिः
2. साहित्यदर्पणः, ६/३१०
3. अग्निपुराणम्, ३३७/१२
4. पाणिनिधातुपाठः, ६४१
5. अष्टाध्यायी, ३/३/१०५
6. अष्टाध्यायी, ४/१/४
7. मनुसंहिता, ३/२३१
8. हलायुदकोशः, पृ. १९७ (रामायणे-१/८/६)
9. हलायुदकोशः, पृ. १९७ (रघुवंशे-८/४३)
10. अभिज्ञानशकुन्तलम्, ३/१ (क)
11. अभिज्ञानशकुन्तलम्, ४/१ (घ)
12. हलायुदकोशः, पृ. १९७
13. साहित्यदर्पणः, ६/३१०
14. अग्निपुराणम्, ३३७/१५-१६
15. रुद्राटालंकारः/काव्यालंकारः, २०-२३
16. भामहालंकारः, १/२८-३०
17. साहित्यदर्पणः, ६/३१०
18. काव्यादर्शः, २३-२८
19. काव्यादर्शः, २९-३०
20. कादम्बरी, कविवंशवर्णनांशे
21. हर्षचरितम्, १/१९
22. सोनारतरी, वर्षायापन कविता, (आधुनिक संस्कृत साहित्य – छोटो गल्प ओ नाटक, पृ. ११)
23. Wikipedia
24. आधुनिक संस्कृतकथायेँ स्थिति ओर प्रवृत्ति, पृ. ६५
25. वांला कथासाहित्य-जिज्ञासा, पृ. ३३
26. बांला छोटोगल्प मनने-दर्पणे, पृ. ३
27. बांला छोटोगल्प मनने-दर्पणे, पृ. ६
28. Wikipedia
29. काव्यादर्शः, १/२८
30. अग्निपुराणम् व्यासदेवस्य – सम्पा. पञ्चानन तर्करत्न, कलकाता, नव भारत पावलिशार्स, कलकाता, द्वितीय संस्करण, बङ्गाब्द १४१९
31. अभिज्ञानशकुन्तलम् कालिदासस्य – सम्पा. सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कलकाता, २०१२
32. कादम्बरी वाणभट्टस्य, महाश्वेतावर्णना - सम्पा. अशोक कुमार बन्दोपाध्याय, सदेश, कलकाता, बङ्गाव्द १४१७
33. कादम्बरी वाणभट्टस्य, शुकनासोपदेशः - सम्पा. अमलकुमार भट्टाचार्य, संस्कृत वुक डिपो, कलकाता, २०१३
34. काव्यादर्शः दण्डिनः – सम्पा. रङ्गाचार्य शास्त्री, भाण्डारकार ओरियेण्टल रिसर्च इनस्टिट्युट्, पुणा, १९३८

35. काव्यादर्शः दण्डिनः – चिन्मयी चट्टोपाध्याय, पश्चिमवङ्ग राज्य पुस्तक पषद्, कलकाता, १९९५
36. काव्यालंकारः भामहस्य – सम्पा. रामदेव शुक्ल, विद्याभवन संस्कृत ग्रन्थमाला, काशी १९६६
37. काव्यालंकारसूत्रवृत्तिः वामनस्य – सम्पा. हरगविन्द शास्त्री, चौखाम्वा सुरभारती प्रकाशन्, वाराणसी, २०१०
38. मनुसंहिता मनोः – सम्पा. सतीशचन्द्र मुखोपाध्याय, वसुमती साहित्य मन्दिर, कलकाता, बङ्गाब्द १३३६
39. साहित्यदर्पणः विश्वनाथकविराजस्य – सम्पा. विमलाकान्त मुखोपाध्याय, संस्कृत पुस्तक भाण्डार, कलकाता, २००८
40. साहित्यदर्पणः विश्वनाथकविराजस्य – सम्पा. करुणाशङ्कर शर्मा, मोतीलाल वनारसी दास, दिल्ली, १९३८
41. हर्षचरितम् वाणभट्टस्य, पञ्चमोच्छवासः – सम्पा. अलका चक्रवर्त्ती, संस्कृत पुस्तक भाण्डार, कलकाता, २००२
42. कुलश्रेष्ठ, रुचि, 'विसवी शताब्दी का संस्कृतलघुकथासाहित्य' – राष्ट्रीय संस्कृत संस्थान, नवदेहली, प्रथमसंस्करण, कालस्योल्लेखो नास्ति।
43. तिवारी, अर्चना, 'आधुनिक संस्कृतकथायँ : स्थिति और प्रवृत्ति' – पद्मजा प्रकाशन, एलाहवाद, प्रथम संस्करण, २०११
44. चट्टोपाध्याय, ऋता, 'आधुनिक संस्कृत साहित्य' छोटगल्प ओ नाटक – प्रोग्रेसिभ पावलिसार्स, कलिकाता, २०१२
45. चौधुरी, शितल, 'वांला छोटोगल्प : मनने दर्पणे' – प्रज्ञा विकाश, कलकाता, द्वितीय प्रकाश, पुनर्मुद्रण, २०१७
46. मुखोपाध्याय, अरुणकुमार, 'वांला कथासाहित्य-जिज्ञासा', दे'ज पावलिशिं, कलकाता, द्वितीय संस्करण, २०१६
47. बन्दोपाध्याय, धीरेन्द्रनाथ, 'संस्कृत साहित्येर इतिहास' – पश्चिमबङ्ग राज्य पुस्तक पर्षत्, कलकाता, २०१५
48. राय, अलोक – साहित्यकोश कथासाहित्य, साहित्यलोक, कोलकाता, द्वितीय संस्करण, १९९३
49. अमरकोषः अमरसिंहस्य – सम्पा. गुरुनाथ विद्यानिधि भट्टाचार्य्य, संस्कृत पुस्तक भाण्डार, कलकाता, बङ्गाब्द १४१७
50. आप्ते, विमान शिवराम, 'The Students English Sanskrit Dictionary' - दिल्ली, तृतीय संस्करण, २०१४
51. झा, सूजन, 'अमरकोश' (Google App, Dictionary) (शब्दकल्पद्रूम-वाचस्पत्यम्-वीलियम-आप्टे, डिक्शानरी सहिता), राष्ट्रिय संस्कृत संस्थान, मुम्बाई
52. बङ्गीय शब्दकोश – सम्पा. हरिचरण बन्दोपाध्याय, साहित्य एकाडेमी, दिल्ली, १९६६
53. हलायुधकोशः हलायुधस्य - पुस्तकस्य तथ्याभावाद् नोल्लिखितम्, (PDF, E-Book)